**न हि सर्वः सर्वं जानाति** Everybody does not know everything. Read : व्याख्यातं न्यायवृन्दं निजमतिमनतिक्रम्य यावन्मयाप्तं पारं प्राप्तुं न शक्तो न हि भवति गुरुः किं पुनर्मादृशो ना। सर्वः सर्वं न वेत्ति प्रथितमिदमतो नास्ति मेऽत्रापराधः शिष्टा ज्ञेयाः स्वयं वै सुविमलमतिभिः सम्यगाराधितार्थैः॥ रघुनाथ.

**न हि सहस्रेणाप्यन्धैः पाटच्चरेभ्यो गृहं रक्ष्यते** Not even a thousand blind men can protect a house from robbers.

**न हि सुशिक्षितोऽपि नटबटुः स्वस्कन्धमधिरोढुं पटुः** No young actor, however well-trained, is clever enough to get on his own shoulder. न हि नटः शिक्षितः सन् स्वस्कन्धमधिरोक्ष्यति। Ś. B. on Br. Sūt. 3. 3. 54.

**न हि सोपानत्के पादे पुनरप्युपानहं प्रतिमुञ्चति** One cannot put on again another shoe on the same foot which has already one.

**न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते** (श्लोकवार्तिक) If a power is not of itself present in a person or thing, it cannot be supplied by another. यदि स्वयं दधिभावशीलता न स्यान्नैवौष्ण्यादिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वा औष्ण्यादिना बलाद्दधिभावमापद्यते। साधनसामग्र्या च तस्य पूर्णता संपाद्यते। Ś. B. on Br. Sūt. 2. 1. 24; cf. न हि यो यस्य स्वतो धर्मो न संभवति सोऽन्यस्य साधर्म्यात् तस्य संभविष्यति। Ś. B. on Br. Sūt. 2. 2. 29.

**न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्** (Ku. 3. 63) For, the words of the Lord never foster a contradictory meaning in the the world.

**न ह्यन्यस्य वितथभावेऽन्यस्य वैतथ्यं भवितमर्हति** The falseness of one person does not prove somebody else to be false. ननु सामान्यतो दृष्टं पौरुषेयं वचनं वितथमुपलभ्य वचनसाम्यादिदमपि वितथमवगम्यते। नान्यत्वात्। न ह्यन्यस्य ... अर्हति। अन्यत्वादेव। न हि देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापि श्यामत्वं भवितुमर्हति। ŚB. on MS. 1. 1. 2; न ह्यनाप्तवाक्यस्य वैतथ्ये सत्याप्तवाक्यस्यापि वैतथ्यम्। पार्थसारथि.

**न ह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति** It is not the fault of the post that a blind man cannot see it.

**नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामति** Intellect which has not grasped the adjective, does not perceive the substantive. जातिरेव शब्दार्थ इति मीमांसकमतम्। तथा हि, व्यक्तीनामानन्त्यादेकव्यक्तौ शक्तिग्रहे व्यक्त्यन्तराबोधाच्च न व्यक्तौ शक्तिसंभवः। जातिविशिष्टायां व्यक्तौ शक्तिरित्युक्तौ तु नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामतीति न्यायाद् आवश्यकत्वाच्च जातावेव शक्तिरस्तु व्यक्तिबोधस्तु आक्षेपात्। लौ.न्याय.; विभक्तिर्हि लिङ्गसंख्याप्रातिपदिकार्थानां श्रुत्यैव क्रियार्थतामाह। क्रिया साध्या साधनं तत्परिच्छेदकानि च लिङ्गसंख्यादीनपेक्षते। अतः सर्वविशेषणविशिष्टा क्रियैव विधीयते। तत्र प्रत्ययः पूर्वं विशेषणे व्याप्रीयतेऽन्यथानुपपत्त्या, न हि अगृहीतविशेषणा विशिष्टे बुद्धिः इति। तंत्र 4. 1. 5; cf. न ह्यप्रतीते विशेषणे विशिष्टं केचन प्रत्येतुमर्हन्ति। ŚB. on MS. 1. 3. 33.

**नान्तरीयकन्यायः** The maxim of invariable, inseparable association; (तदभावे तदभावरूपा व्याप्तिः।) cf. अविनाभावः संबन्धमात्रं न तु नान्तरीयकत्वम्। K. P. 2.; यत्र च संबन्धो विधीयते तत्रान्यतरस्यान्यत्र विधानम्, संबन्धो नान्तरीयको यद् वा संबन्धस्य विधानं नान्तरीयकौ संबन्धिनौ ŚB. on MS. 3. 3. 21; नान्तरीयमवश्यंभावीत्यर्थः। यथा– प्रतिबन्धकाभावे नान्तरीयकार्योत्पत्तिः अवश्यंभाविनीत्यर्थ इत्युक्तम्। यथा च कश्चिद्धान्यार्थी शालिकलापं सपलालं सतुषमाहरति नान्तरीयकत्वात्, स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सकण्टकान् सशल्कलानाहरति नान्तरीयकत्वात्, स यावदादेयं तावदादाय शल्कलकण्टकान्युत्सृजतीति। लौ. न्याय.



**नारिकेलफलाम्बुन्यायः** The maxim of water in a cocoanut fruit. Used to illustrate when a thing is beyond any logical reasoning. यथा दृढावयवसंयोगवति नारिकेलफले कथं जलमायातीति न तर्कगोचरतामेति, तथागता लक्ष्मीर्नैवं लक्ष्यते। उक्तं च "आगता लक्ष्यते नैव नारिकेलफलाम्बुवत्" इति। लक्ष्मीरिति शेषः। लौ. न्याय. cf. Marāṭhī proverb "देवाची करणी आणि नारळांत पाणी."

**नासाधितं करणम्** That which itself is not an accomplished fact cannot be an instrument with which to bring about some other result. cf. नासाधिते हि धात्वर्थे करणत्वं ततोऽस्य सा। साध्यतां वक्ति संस्कारो नैवाशक्यः क्रियात्वतः। J. N. V.

**निरङ्कुशाः कवयः** (Sk.) Poets are unfettered, completely free. This is used to emphasize the well-known 'poetic licence'. This condones all grammatical and other lapses committed by Kālidāsa and other great writers. प्रभुः स्वातन्त्र्यमापन्नो यदिच्छति करोति तत्। पाणिनेर्नदी गङ्गा यमुना च स्थली नदी॥ "I, too, am indignant when the worthy Homer nods, but in a long work it is allowable to snatch a little sleep." Horace, Ars Poetica.

**निरस्तपादपे देशे एरण्डोऽपि द्रुमायते** (Subhāṣ.) When there is dearth of wise and honest persons, persons with smattering of knowledge are accorded honour and respect. यत्र बहुसज्जनदुर्लभत्वेऽल्पज्ञादरस्तत्रायं प्रवर्तते। उक्तं च— यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि। निरस्त...... द्रुमायते। लौ. न्याय. cf. Marāṭhī proverb "वासरांत लंगडी गाय शहाणी."

**निर्धनमनोरथन्यायः** The simile of 'the cars of the mind' or wish of the penniless. उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः। Udb.; उन्नम्योन्नम्य तत्रैव निर्धनानां मनोरथाः। हृदयेष्वेव लीयन्ते विधवास्त्रीस्तनाविव॥ "If wishes were horses, beggars might ride."

**निवातस्थितदीपन्यायः** The simile of a lamp placed in a windless place. This is used to denote that a person whose mind has attained complete serenity becomes steadied in meditation, just as a lamp in a windless place, burns steadily, without flicker. cf. यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता। योगिनो यतचित्तस्य युञ्जतो योगमात्मनः। Bg. 6. 19.

**निषादस्थपतिन्यायः** Vide Dictionary p. 926.

**नीरक्षीरन्यायः** The simile of discriminating water and milk mixed together. It is used to denote the